सुबुद्धिः—अनुमरणेऽपि विसंवदितं मम सुबुद्धित्वं, न तु तव सुवत्सलात्वम्।

सुव०—भअवदि! जं तुह बिद्धिविहओ मन्तसत्तीवि विसंवदइ तं रुप्पिणीए दुद्दैवं अवरज्झदि। कन्हो उण रुप्पिणिं परिहविस्सदित्ति ण मह हिअअं पत्तिआअदि। भअवदीए वि तत्थ कन्हपरिअणादो एदं विदिदं येव–

जावच्चिअ हरिहिअए रुप्पिणिणामंति अक्खरो मन्तो।
संचरिओ तावच्चिअ उव्वसिअं इअरदइआहिं॥ ३॥

ता नंदअसहाअत्तणेणवि सहला भविस्सदि भअवदीए मन्तसत्ती।

सुबुद्धिः—सुवत्सले! एहि तावदाश्वासयामो वत्साम्।

सुवत्सला—भअवदि! तीए आसासणत्थं पेसिदं मह मअरंदिआहत्थे कन्हस्स आलेक्खं। ता एदु भअवदी। कन्हसिविरं गडुअ अलक्खिदा सव्वं जाणिअ तुरिदमुवसप्पम्ह रुप्पिणिं।

सुबुद्धिः—सुवत्सले! अद्यापि यदि त्वमित्थं सोत्साहासि, तद्गृहाण रुक्मिणीसनाथमालेख्यं। येन कृष्णो विलोभ्यते।

सुवत्सला—ता इमिणा मग्गेण सुरेहं चित्तअरं आलेक्खसणाहं गेण्हिअ गमिस्सामो।

( इति निष्क्रान्ते )

**विष्कम्भकः**

---

१ भगवति! यत्तव बुद्धिविभवो मन्त्रशक्त्यपि विसंवदति तन् रुक्मिण्या दुर्दैवमपराध्यति। कृष्णः पुनः रुक्मिणीं परिभविष्यतीति न मम हृदयं प्रत्ययते। भगवत्या अपि तत्र कृष्णपरिजनादेतद्विदितमेव।

यावदेव हरिहृदये रुक्मिणीनामेति अक्षरो मन्त्रः।
सञ्चरितः तावदेव उद्वसितमितरदयिताभिः॥ ३॥

२ तन्नन्दकसहायत्वेनापि सफला भविष्यति भगवत्या मन्त्रशक्तिः।

३ भगवति! तस्या आश्वासनार्थं प्रेषितं मम मकरन्दिकाया हस्ते कृष्णस्यालेख्यम्। तदेतु भगवती। कृष्णशिविरं गत्वा अलक्षिता सर्वं ज्ञात्वा त्वरितमुपसर्पाव रुक्मिणीम्।

४ तदमुना मार्गेण सुलेखं चित्रकारमालेख्यसनाथं गृहीत्वा गमिष्यावः।

( कपटकेलिः विहस्य ज्ञानराशेर्मुखमीक्षते )

पारावतः—अरेरे तुमं उज्झाणवालो' ? ।

कौण्डिन्यः—अध इं' ? ।

कोकिलः—पारावआ ! जं अत्ता णिहुअं हसिऊण भअवदो मुहं पेक्खदि, तां एसोज्येव सो एदस्स दुदीओ कोंडिण्णो । ( इति सहसोपसृत्य तमपि धारयति )

पारावतः—एसो वि एदस्स भअवओ । इध ता समअं चिअ दोन्हवि भोदु सिद्धी ।

( इति योगपट्टाभ्यां द्वयोरपि कण्ठौ संदानयतः )

कौण्डिन्यः—( सानन्दं दीर्घं निःश्वस्य ) पिअणिअट्ठाणेसु चिट्ठन्तु णिहाणाइं । किलिम्मदु दालिद्दद्दुमिओ लोओ । उंचरमदि नाणरासी' ।

कोकिलः—( सशङ्कम् ) रेरे जाणादि तुह उअज्झाओ णिहाणाइं' ? ।

कौण्डिन्यः—को न एत्थ एदिणा कअत्थीकदो' ? ।

कोकिलः—( सहसोपसृत्य ) भअवं णाणरासे ! अनुगेन्हदु अम्हे' ।

ज्ञान०—( स्वगतम् ) साधु कौण्डिन्य ! साधु ! तदेवं तावत् । ( प्रकाशम् ) वत्स ! आर्त्तोऽयं प्रलपति । क्रियतामस्मासु समीहितम् ।

( कोकिलपारावतौ योगपट्टौ विहाय पदयोः प्रणिपत्य )

उभौ—पसीददु पसीददु अप्पो । फरेसु अम्हे अदलिद्दे' ।

ज्ञान०—वत्सौ ! क्षान्तं मया । क्षमाधना हि मादृशाः । परोपकार ए-

वासु०—( स्वगतं सहर्षम् ) हृदय ! हृदय ! दिष्ट्या वर्द्धसे कमलावलोकन-प्रत्यासत्त्या । नहि नहि महेशव्याहृतयो वृथा भवन्ति । ( प्रकाशं सौत्सुक्यम् ) त्वरध्वं त्वरध्वं सुरासुराः । भ्रमयन्तु मथ्नन्तो मन्थाचलम् ।

( सर्वे तथा कुर्वन्ति )

इन्द्रः—( साश्चर्यं ससम्भ्रमम् ) शाम्यतु शाम्यतु तावन्मथनावर्त्तः । अवतरति किमपि सौम्यतरं वस्तु ।

( सर्वे साश्चर्यं निरूपयन्ति )

वासु०—( विलोक्य सवितर्कम् )

समुल्लसत्सौम्यमहोमहोर्मिः
सहोदरः किं भवितायमिन्दोः ।
अपूरको नेत्रमहोत्सवस्य
मध्ये स तादृङ् न तु कालिमास्ति ॥ ५५ ॥

इन्द्रः—( निरूप्य साश्चर्यम् ) अहो ! सहसैव निर्गत्य स्फुटीबभूव स्त्रीरूपमिदम् ।

वासु०—( विभाव्य साश्चर्यम् ) अहो ! रूपमस्याः ।

अधिजलनिधिगर्भं कोऽपि लावण्यवार्द्धि-
र्निवसति जनिरस्यास्तत्र नूनं बभूव ।
भवति हि कथमित्थं योग्यनाऽस्यैव वार्द्धे-
रनूनकरसुधाया यत्प्रसूतिः प्रशस्या ॥ ५६ ॥

अपि च—

अस्याः स्फुरत्कान्तिविनूपिताव्धेः
कल्लोलदोलातरलाङ्गयष्टेः ।
आपूरयन्त्याः ककुभोऽक्षिपक्ष्म-
राकल्पमेवाभरणत्वमेति ॥ ५७ ॥

( प्रत्यभिज्ञाय स्वगतं सोत्कण्ठम् ) नूनमियं गङ्गया आलिङ्ग्य कथिता मा पयोधिपुत्री भविष्यति । तथाहि—

